
प्रथमः पाठः

# वाङ्मयं तपः



**आचार्यः** – प्रियच्छात्राः! पठिताः अस्माभिः ऋग्वेदस्य मन्त्राः। ज्ञायते किम् ऋग्वेदस्तु विश्वसाहित्ये आदिमः आलेखः। सार्वकालिकाः सार्वभौमिकाः च अस्य उपदेशाः।

**छात्राः** – आम्! तथैव कथितं **सङ्गच्छध्वं संवदध्वम्।**

**आचार्यः** – साधु! जानन्ति किं भवन्तः वाचः महत्त्वम्?

**सुमेधा** – अहं वदानि। **वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते।**

**आचार्यः** – शोभनम्। विद्यावतां वाचि सरस्वती विराजते। इदमेव शिक्षयति अयं पाठः **वाङ्मयं तपः**।

प्रथमः पाठः

# वाङ्मयं तपः

शारदा शारदाम्भोजवदना वदनाम्बुजे।
सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात्॥ 1॥

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति!
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्॥ 2॥

नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः।
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम्॥ 3॥

न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया।
प्रह्लादयति च पुरुषं यथा मधुरभाषिणी वाणी॥ 4॥

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।
ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः॥ 5॥

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
धैर्यं लयसमर्थं च षडेते पाठका गुणाः॥ 6॥

आचार्यात्पादमादत्ते पादं शिष्यः स्वमेधया।
कालेन पादमादत्ते पादं सब्रह्मचारिभिः॥ 7॥

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥ 8॥

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **अक्षरव्यक्तिः** (सं) (स्त्री०प्र०ए०व०) [अक्षराणां व्यक्तिः, ष०त०] | वर्णानां स्पष्टता | वर्णों का स्पष्ट उच्चारण | distinct pronunciation of syllables. |
| **अनुद्वेगकरम्** (वि०) (नपुं०प्र०ए०व०) [न उद्वेगकरम्, नञ् त०पु०, उद्वेगं करोति इति उद्वेगकरः, उप०त०पु०] | (यत् वाक्यं) व्याकुलतां न उत्पादयति | व्याकुलता न उत्पन्न करने वाला | not causing anxiety. |

| | | | |
|---|---|---|---|
| **अपूर्वः** (वि०) [न पूर्वः, नञ् त०पु०] | असाधारणः | अनोखा, विशिष्ट | Unprecedented. |
| **अपोहः** (सं०) (पु०प्र०ए०व०) (अप+ऊह्+घञ्) | ऊहस्य (तर्कस्य) विलोमः | तर्क लगाना, तर्क शक्ति द्वारा शंका निवारण, निषेधात्मक चिन्तन | opposite of arguments against the subject, antithesis, negative thought. |
| **अर्थविज्ञानम्** (सं०) (नपुं०प्र०ए०व०) [अर्थस्य विज्ञानम्, ष०त०] | अर्थस्य विवेचनम् | शब्दों के अर्थ का ज्ञान | knowledge of the (word) meanings. |
| **ऊहः** (सं०) (पु०प्र०ए०व०) [ऊह्+घञ्] | सूक्ष्मविचारणा, चिन्तनम्, अनुमानम् | तर्क लगाना, चिन्तन करना, अनुमान लगाना | reasoning in favour of positive arguments, deliberations. |
| **कोशः** (सं०) (पु०प्र०ए०व०) | निधिः | खजाना | treasure accumulated wealth, treasure-house. |
| **क्रियात्** (सन्निधिम्) (क्रि०) [कृ+आशीर्लिङ् प्र०पु०ए०व०] | उपस्थिता भवेत् | (उपस्थित) होवें | may please abide. |
| **धीगुणाः** (सं०) (पु०प्र०ब०व०) [धियो गुणाः, ष०त०] | बुद्धेः लक्षणानि | बुद्धि के गुण (लक्षण) | characteristics of intelligence. |
| **पदच्छेदः** (सं०) (पु०प्र०ए०व०) [पदानां छेदः, ष०त०] | पदानां विश्लेषणम् | पदों को अलग करना | separating the Padas, words. |
| **पादम्** (सं०) (पु०द्वि०ए०व०) | चतुर्थांशम् | चतुर्थ भाग को, चौथाई को | one fourth. |
| **प्रियहितम्** (वि०) (नपुं०प्र०ए०व०) प्रियं च तत् हितं च, द्वन्द्वः | प्रियं हितकरं च | प्रिय लगने वाला और हितकारी | beneficial and pleasant. |
| **भारति** (सं०) (स्त्री०सम्बो०ए०व०) | हे सरस्वति | हे देवी सरस्वती | O goddess Saraswati. |
| **माधुर्यम्** (सं०) (नपुं०प्र०ए०व०) [मधुर+ष्यञ्] | मधुरता | मिठास | sweetness. |
| **लयसमर्थम्** (सं०) (नपुं०ए०व०) [काल–क्रिया–साम्यं लयः, स्वरस्य अपरपर्यायः] | अनुरणनविशेषः | वर्णों के समुचित स्थान, प्रयत्न और बलाघात के साथ उच्चारण की सामर्थ्य; स्पष्ट उच्चारण | capability to pronounce sounds with proper place and manner of. |



| | | | |
|---|---|---|---|
| **वदनाम्बुजे** (सं०)(नपुं०स०ए०व०) [वदनम् एव अम्बुजम्, तस्मिन्, कर्मधा०] | कमलमुखे | कमल के समान मुख में | in the lotus like mouth. |
| **वाङ्मयम्** (वि०) (नपुं०प्र०ए०व०) (तपः) [वाक्+मयम्; वाच्+मयट्] | वाचिकम् (तपः) | वाणी का, वाणी से सम्बन्धित | striving hard towards the perfection of speech. |
| **व्ययतः** (अव्य०) [व्यय+तसिल्] | उपयोगात् | खर्च करने से; व्यय (उपयोग प्रयोग) करने से | by spending, by using. |
| **शारदा** (सं०) (स्त्री०प्र०ए०व०) [शरदि भव इति] | सरस्वती पर्यायाः- ब्राह्मी, भारती, भाषा, गीः, वाक्, वाणी। | विद्या की देवी | Goddess of learning. |
| **शारदाम्भोजवदना** (वि०) (स्त्री०प्र०ए०व०) [शारद+ अम्भोज+वदना, शारदम् अम्भोजम्-शारदाम्भोजम्, कर्मधा०, तत् इव वदनम् यस्याः सा, ब्र०व्री०] | शरत्कालीनं कमलम् इव मुखं यस्याः सा (सरस्वती) | शरत्कालीन कमल के समान मुखवाली | having a face like a lotus of autumn. |
| **शीतलसलिलम्** (सं०) (नपुं०प्र० ए०व०) [शीतलं च तत् सलिलम्, कर्मधा०] | शीतलं जलम् पर्यायाः-सलिलम्, जलम्, वारि, नीरम्, तोयम्, अम्बु, पयस्, अप् | ठण्डा पानी | cold water. |
| **शुश्रूषा** (सं०) (स्त्री०प्र०ए०व०) [श्रु+सन्+टाप्] | श्रोतुम् इच्छा | सुनने की इच्छा | desire to listen. |
| **श्रवणम्** (सं०) (नपुं०प्र०ए०व०) [श्रु+ल्युट्] | ध्यानेन श्रवणम् | सुनना | listening. |
| **सन्निधिम्** (सं०) (पु०द्वि०ए०व०) | सामीप्यम्, उपवेशनम् | समीपता | Proximity, nearness, |
| | उपस्थितिः (सन्निधिं क्रियात्) | उपस्थित होना (समीप निवास करे) | Presence, Take one's seat, place or abode in, |
| | सत् निधिं क्रियात् | (हमारे मुख में) श्रेष्ठ निधि के रूप में निवास करे | may reside in our mouths like an excellent treasure. |

| | | | |
|---|---|---|---|
| **सर्वदा** (वि०) (स्त्री०प्र०ए०व०) [सर्वं ददाति इति सर्वद:, उपपद त०पु०+टाप्] | सर्वदात्री | सब कुछ देने वाली | bestower of everything. |
| **सर्वदा** (अव्य०) [सर्व+दाच्] | नित्यम् | सदा, हमेशा | always. |
| **स्वमेधया** (सं०) (स्त्री०तृ०ए०व०) [स्वा च सा मेधा तया कर्मधा०] | स्वबुद्ध्या | अपनी बुद्धि के द्वारा | with one's own intellect. |
| **स्वाध्यायाभ्यसनम्** (सं०) (नपुं०प्र०ए०व०) [स्वाध्याय: च अभ्यसनं च, द्वन्द्व:] | स्वाध्याय: - वेदाभ्यास:, जप: अभ्यसनम् - अभ्यास: | स्वाध्याय और अभ्यास | Perusal or study of Vedas, one's self reading and Practice. |

## इदमपि जानन्तु

### सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| शारदाम्भोजवदना | = | शारद+अम्भोजवदना | वदनाम्बुजे | = | वदन+अम्बुजे |
| सन्निधिम् | = | सत्+निधिम् | कोऽपि | = | क:+अपि |
| कोशोऽयम् | = | कोश:+अयम् | व्ययतो वृद्धिमायाति | = | व्ययत:+वृद्धिमायाति |
| सञ्चयात् | = | सम्+चयात् | नास्ति | = | न+अस्ति |
| सत्यसमं तप: | = | सत्यसमम्+तप: | चन्दनरसो न | = | चन्दनरस:+न |
| ऊहापोहार्थविज्ञानम् | = | ऊह+अपोह+अर्थविज्ञानम् | चैव | = | च+एव |
| पदच्छेदस्तु | = | पद+छेद:+तु | षडेते | = | षट्+एते |
| वाङ्मयम् | = | वाक्+मयम् | तप उच्यते | = | तप:+उच्यते |
| पाठका गुणा: | = | पाठका:+गुणा: | | | |

### सन्धिकार्यम्

शिष्य:+स्वमेधया = शिष्यस्स्वमेधया

### संयोग:

| | | | | | |
|---|---|---|---|---|---|
| वृद्धिमायाति | = | वृद्धिम्+आयाति | क्षयमायाति | = | क्षयम्+आयाति |
| आचार्यात्पादमादत्ते | = | आचार्यात्+पादम्+आदत्ते | पादमादत्ते | = | पादम्+आदत्ते |

# अभ्यासः

1. **निम्नलिखितप्रश्नानाम् उत्तराणि एकपदेन उत्तरत –**

(क) का अस्माकं सन्निधिं कुर्यात् ? ....................................

(ख) कोशः कथम् अस्ति ? ....................................

(ग) सत्यसमं किम् अस्ति ? ....................................

(घ) कीदृशी वाणी पुरुषं प्रह्लादयति ? ....................................

(ङ) पाठकानां कति गुणाः श्लोके वर्णिताः ? ....................................

(च) स्वस्य मेधया कः पादम् आदत्ते ? ....................................

2. **अधोलिखितप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत –**

(क) भारत्याः कोशः कीदृशः विद्यते ?

....................................................................................................

(ख) के पाठकाः गुणाः सन्ति ?

....................................................................................................

(ग) धियः गुणाः के के सन्ति ?

....................................................................................................

(घ) शिष्यः विद्यायाः अर्जनं कथं करोति ?

....................................................................................................

(ङ) कीदृशी शारदा सन्निधिं क्रियात् ?

....................................................................................................

(च) वाङ्मयं तपः किम् उच्यते ?

....................................................................................................

3. **स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत –**

(क) **शारदा** सर्वदा अस्माकं समीपे वसेत्। ....................................

(ख) **भारत्याः** कोशः अपूर्वः। ....................................

(ग) मधुरभाषिणी वाणी **पुरुषं** प्रह्लादयति। ..........................................

(घ) पाठकस्य **षट्** गुणा: सन्ति। ..........................................

(ङ) **सत्येन** समं सुखं नास्ति। ..........................................

(च) **अनुद्वेगकरं** वाक्यं वाङ्मयं तप: उच्यते। ..........................................

(छ) **रागस्य** विलोम: त्याग:। ..........................................

**4. अधोलिखितान् प्रश्नान् यथानिर्देशम् उत्तरत –**

(क) 'अपूर्व: कोशोऽयं विद्यते तव भारति।' अत्र क्रियापदं किम् ? ..............................

(ख) प्रथमे श्लाके कर्तृपदं किम्? ..............................

(ग) 'शीतला छाया' अनयो: पदयो: विशेष्यपदं किम्? ..............................

(घ) 'उद्वेगकरम्' इति पदस्य विलोमपदं पाठात् चित्वा लिखत। ..............................

(ङ) 'शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।' अस्मिन् वाक्ये 'श्रोतुम् इच्छा' इत्यर्थे किं पदं प्रयुक्तम्? ..............................

(च) 'व्ययत:' इति पदस्य विलोमपदं पाठात् चित्वा लिखत। ..............................

**5. स्तम्भद्वये लिखितानां समानार्थकशब्दानां समुचितं मेलनं कृत्वा लिखत –**

| | | | |
|---|---|---|---|
| (क) शुश्रूषा | चतुर्थांशम् | (क) शुश्रूषा | श्रोतुम् इच्छा |
| (ख) ऊह: | निवासम् | ...................... | ...................... |
| (ग) अपोह: | मुखम् | ...................... | ...................... |
| (घ) पादम् | वाणी | ...................... | ...................... |
| (ङ) सन्निधिम् | श्रोतुमिच्छा | ...................... | ...................... |
| (च) वदनम् | सरस्वती | ...................... | ...................... |
| (छ) वाक् | पक्षे तर्क: | ...................... | ...................... |
| (ज) भारती | शङ्कानिवारणम् | ...................... | ...................... |

**6. अत्र पठितेभ्य: श्लोकेभ्य: कानिचित् पदानि सन्ति। तेषां विशेषणानि अध: मञ्जूषायां दत्तानि। तत: उपयुक्तं विशेषणं चित्वा विशेष्येण सह योजयित्वा लिखत –**

.................................. वाणी .................................. सलिलम्

| | | | |
|---|---|---|---|
| ............................ | छाया | ............................ | तपः |
| ............................ | शारदा | ............................ | कोशः |
| ............................ | चक्षुः | ............................ | वाक्यम् |

**मञ्जूषा** – शीतला, वाङ्मयम्, शीतलम्, विद्यासमम्, अपूर्वः, प्रियहितम्, सर्वदा, मधुरभाषिणी


**7. समानभावमयीः पङ्क्तीः योजयत –**

| | | | |
|---|---|---|---|
| **यथा** (i) नास्ति विद्यासमं चक्षुः। | (क) मुखकमले निवासं कुर्यात्। | (i) ग | |
| (ii) व्ययतः वृद्धिमायाति। | (ख) वाङ्माधुर्यात् नान्यदस्ति प्रियत्वम्। | (ii) .................. | |
| (iii) वदनाम्बुजे सन्निधिं क्रियात्। | (ग) सर्वस्य लोचनं शास्त्रम्। | (iii) .................. | |
| (iv) मधुरभाषिणी वाणी पुरुषं प्रह्लादयति। | (घ) शिक्ष्यते सहपाठिभिः। | (iv) .................. | |
| (v) पादं सब्रह्मचारिभिः | (ङ) दत्ता भवति विस्तृता। | (v) .................. | |

**8. रेखाचित्रं पूरयत –**


(क)

**यथा**





(ख)

**यथा**



(ग)




**9. वाक्यांशं पूरयत-**

(क) व्ययतः वृद्धिमायाति

..............................................................................................................

(ख) नास्ति रागसमं दुःखम्

..............................................................................................................

(ग) नास्ति नास्ति विद्यासमं चक्षुः

..............................................................................................................

(घ) आचार्यात्पादमादत्ते

..............................................................................................................

**10. श्लोकमाश्रित्य समुचितक्रमेण अन्वयं पूरयत -**

(क) हे भारति! तव अयम् कोशः कः अपि .............................. विद्यते। (अयम्) व्ययतः वृद्धिम् .............................., सञ्चयात् च .............................. आयाति।

(ख) विद्यासमम् .............................. न अस्ति, सत्यसमम् तपः न .............................., रागसमम् .............................. न अस्ति .............................. सुखम् न अस्ति।

(ग) यत् वाक्यम् .............................. सत्यम् .............................. च (तथा) स्वाध्याय-अभ्यसनम् च एव .............................. तपः उच्यते।

**11. अधोलिखितपङ्क्तिषु स्थूलाक्षरपदानां प्रसङ्गानुसारं शुद्धम् अर्थं चिनुत -**

(क) स्वाध्यायाभ्यसनं चैव **वाङ्मयं** तपः उच्यते।

(i) साहित्यम् (ii) वाचिकम् (iii) मनोमयम्

(ख) आचार्यात् **पादम्** आदत्ते।

(i) श्लोकस्य पङ्क्तिम् (ii) चरणम् (iii) चतुर्थांशम्

(ग) **माधुर्यम्** अक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।

(i) शर्करायुक्तम् (ii) कोमलतया वर्णोच्चारणम् (iii) मधुरतायाः अभावः

(घ) **सर्वदा** सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात्।

(i) सर्वं ददाति इति (ii) सर्वाधिका (iii) सर्वं वदति इति

**12. रेखाङ्कितपदानां समस्तपदं विग्रहं वा लिखत –**

(क) नास्ति विद्यासमं चक्षुः। ..................................................

(ख) नास्ति त्यागेन समं सुखम्। ..................................................

(ग) न तथा शीतलसलिलं पुरुषं प्रह्लादयति। ..................................................

(घ) न चन्दनस्य रसः मानवं तथा तर्पयति। ..................................................

(ङ) सर्वदा शारदा अस्माकं सन्निधिं क्रियात्। ..................................................

(च) शारदाम्भोजम् इव वदनं यस्याः सा अस्माकं
वदनाम्बुजे सन्निधिं क्रियात्। ..................................................

(छ) अनुद्वेगकरं वाक्यं वाङ्मयं तपः उच्यते। ..................................................

**13. पठितः पाठः। इदानीं क्रीडामः। सर्वे छात्राः वर्गद्वये विभक्ताः स्युः। वाल्मीकिवर्गः व्यासवर्गश्च। वाल्मीकिवर्गात् एकः छात्रः प्रश्नं पृच्छति व्यासवर्गात् च कश्चित् उत्तरति। पुनश्च व्यासवर्गात् प्रश्नः पृच्छ्यते वाल्मीकिवर्गात् उत्तरं दीयते। शिक्षकः अङ्कप्रदानं करोति। सर्वाधिकान् अङ्कान् लभमानः वर्गः विजेता घोष्यते।**

| **वाल्मीकिवर्गः** | **व्यासवर्गः** |
|---|---|
| (क) 'अम्भोजः' इति शब्दस्य पर्यायः कः? | .................................................. |
| (ख) .................................................. | 'शरत्कालीन' इति कस्य अर्थः? |
| (ग) सरस्वत्याः कोशः कथं वर्धते? | .................................................. |
| (घ) .................................................. | कया समं चक्षुर्न विद्यते? |
| (ङ) कीदृशी वाणी पुरुषं प्रसन्नं करोति? | .................................................. |
| (च) .................................................. | शारदा सर्वदा कुत्र निवसेत्? |

(छ) उद्वेगकरम् इत्यस्य कः विलोमः ? ..................................................

(ज) .................................................. सप्तमे श्लोके 'चतुर्थांशः' कस्य अर्थः ?

(झ) 'ऊहः' शब्दस्य कः विलोमः ? ..................................................

(ञ) .................................................. बुद्धेः प्रथमः गुणः कः ?

## अन्वयाः

1. शारद-अम्भोज-वदना सर्वदा शारदा अस्माकम् वदन-अम्बुजे सर्वदा सत् निधिम् सन्निधिम् क्रियात्।
2. भारति! तव अयम् कोशः कः अपि अपूर्वः विद्यते। व्ययतः वृद्धिम् आयाति सञ्चयात् च क्षयम् आयाति।
3. विद्यासमम् चक्षुः न अस्ति, सत्यसमम् तपः न अस्ति। रागसमम् दुःखम् न अस्ति, त्यागसमम् सुखम् न अस्ति।
4. यथा मधुरभाषिणी वाणी पुरुषम् प्रह्लादयति तथा शीतल-सलिलम् न, चन्दनरसः न, शीतला छाया च न (प्रह्लादयति)।
5. शुश्रूषा, श्रवणम् च एव, ग्रहणम् तथा धारणम्, ऊह-अपोह-अर्थविज्ञानम्, तत्त्वज्ञानम् च धीगुणाः (सन्ति)।
6. माधुर्यम्, अक्षरव्यक्तिः, पदच्छेदः तु सुस्वरः धैर्यम् लयसमर्थम् च एते षट् पाठकाः गुणाः (सन्ति)।
7. शिष्यः आचार्यात् पादम् आदत्ते। (शिष्यः) स्वमेधया पादम् (आदत्ते), (शिष्यः) कालेन पादम् आदत्ते, (शिष्यः) सब्रह्मचारिभिः पादम् आदत्ते।
8. यत् वाक्यम् अनुद्वेगकरम् सत्यम् प्रियहितम् च (तथा) स्वाध्याय-अभ्यसनम् च एव वाङ्मयम् तपः उच्यते।।

## योग्यताविस्तारः

**(न परीक्षाकृते)**

### (क) लेखकपरिचयः

एते श्लोकाः विभिन्नेभ्यः ग्रन्थेभ्यः सङ्कलिताः। प्रथमश्लोकद्वयं सुभाषितरत्नभाण्डागारतः तृतीयः, पञ्चमः सप्तमः च श्लोकः महाभारतात्, चतुर्थः कामन्दकीयनीतेः, षष्ठः पाणिनिशिक्षातः, अष्टमः च गीतायाः।

### (ख) भाव-विकासः

**माधुर्यम्** — श्रवणमधुरता, कोमलतया वर्णोच्चारणम्।

**अक्षरव्यक्तिः** — कोमलत्वेऽप्यक्षराणां स्पष्टतयोच्चारणम्।

**पदच्छेदः** — पदानां पार्थक्येनोच्चारणम्।

**लयसमर्थञ्च** — धैर्यं तच्च स्वरताललयादिप्रदर्शने।

**अधोलिखिताः पठनस्य दोषाः**

गीती शीघ्री शिरःकम्पी यथालिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाऽधमाः॥

**विद्याविषयकसूक्तयः**

ज्ञातिभिर्वण्ट्यते नैव चौरेणापि न नीयते।
न दानेन क्षयं याति विद्यारत्नं महाधनम्॥ 1॥
रूपयौवनसम्पन्ना विशालकुलसम्भवाः।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥ 2॥

**सरस्वतीविषयकसूक्तयः**

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती॥
इदमन्धन्तमः कृत्स्नं प्रजायते भुवस्तलम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥

**उच्चारणविषयकपद्यम्**

व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।
भीता पतनभेदाभ्यां तद्वद् वर्णान् प्रयोजयेत्॥

**एवं विद्याविषयकपद्यानां सरस्वतीविषयकपद्यानां च सङ्कलनं क्रियताम्।**

**भाषा-विस्तारः**

**क.** तृतीयान्तपदं सम-सदृश-ऊन-मिश्रशब्दैः समस्यते

यथा- मात्रा समः- मातृसमः (बालकः)
मात्रा सदृशः-मातृसदृशः
माषेण ऊनम् - माषोणम्
गुडेन मिश्रः-गुडमिश्रः।

अत्र तृतीयातत्पुरुषः समासः वर्तते।

**ख.**
1. कुम्भं करोति इति कुम्भकारः
2. निशां करोति इति निशाकरः
3. प्रियं वदति इति प्रियंवदः
4. भयं करोति इति भयङ्करः
5. द्वाभ्यां पिबति इति द्विपः (हस्ती)
6. उरसा गच्छति इति उरगः (सर्पः)

**अत्र उपपदतत्पुरुषः समासः।**

## प्रहेलिका

**कस्तूरी जायते कस्मात् को हन्ति करिणां कुलम्।**
**किं कुर्यात् कातरो युद्धे मृगात् सिंहः पलायनम्॥**

अत्र चरणत्रये त्रयः प्रश्नाः चतुर्थे चरणे त्रयाणाम् एव उत्तरं वर्तते। कस्तूरी कस्मात् जायते इति प्रथमः प्रश्नः, 'करिणां कुलं कः हन्ति' इति द्वितीयः प्रश्नः, कातरः युद्धे किं कुर्यात् इति तृतीयः प्रश्नः।

## एहि हसाम

**शिक्षकः –** पृथिव्याः अक्षरेखा एका काल्पनिकी रेखा। तत्र वस्त्राणि प्रसारयितुं न शक्यन्ते इति जानन्ति वा भवन्तः?

**एकः छात्रः –** परन्तु महोदय! तत्र काल्पनिकानि वस्त्राणि तु प्रसारयितुं शक्यानि एव ननु?